SET -1

# DAV PUBIC SCHOOLS, ODISHA

## PRE-BOARD EXAMINATION, 2023-24

- Please check that this question paper contains **10** printed pages.
- Check that this question paper contains **18** questions.
- Write down the Serial Number of the question in the left side of the margin before attempting it.
- 15 minutes time has been allotted to read this question paper. The question paper will be distributed 15 minutes prior to the commencement of the examination. The students will read the question paper only and will not write any answer on the answer script during this period.

## कक्षा - दशमी

## संस्कृतम् (सम्प्रेषणात्मकम्)

## कोड् सङ्ख्या-119

**समयः - 3 होराः** **पूर्णाङ्काः - 80**

**सामान्यनिर्देशाः -**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे **10** पृष्ठानि मुद्रितानि सन्ति।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे **18** प्रश्नाः सन्ति।
3. अस्मिन् प्रश्नपत्रे चत्वारः भागाः सन्ति।

| | | | |
|---|---|---|---|
| 'क' भागः | : | अपठितावबोधनम् | **10** अङ्काः |
| 'ख' भागः | : | रचनात्मककार्यम् | **15** अङ्काः |
| 'ग' भागः | : | अनुप्रयुक्तव्याकरणम् | **25** अङ्काः |
| 'घ' भागः | : | पठितावबोधनम् | **30** अङ्काः |

4. प्रत्येकं भागम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
5. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
6. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः।
7. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
8. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

## 'क' भागः

## अपठितावबोधनम् (10 अङ्काः)

**1. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – 10**

कश्चन बालकः आसीत् । तस्य पिता अतीव निर्धनः आसीत् । बालकः अध्ययनं कर्तुम् इच्छति स्म । किन्तु यस्मिन् गृहे उदरपूर्ति-समस्यायाः एव उत्तरं न आसीत् तत्र तस्य अध्ययनाय व्यवस्था कथं भवेत् ? अतः बालकः विद्यालयं गच्छतः स्वसमवयस्क-बालकान् दृष्ट्वा दुःखेन निश्वसिति स्म । सः बालकः स्नेहपरः, मृदुभाषी, उत्साहमूर्तिः च आसीत् । पित्रा सह कार्यं कुर्वन् सः बहूनां बालानां मैत्रीं सम्पादितवान् । ते बालाः तम् अक्षराणि अपाठयन् । अक्षराभ्यासं कृत्वा अन्यैः व्यवहृतपूर्वाणि पुस्तकानि पठन् शब्दज्ञानादिकं प्राप्तवान् सः । 'पुत्रः विद्यालयं प्रति प्रेषणीयः' इति पितुः अपि तीव्रा इच्छा आसीत् । किन्तु निर्धनता - जन्या असहायता तं बाधते स्म । अधिक-धनार्जनस्य आशया सः कदाचित् पुत्रेण सह कोलकात्तानगरं प्रति प्रस्थितवान् । रेलयानेन गमनाय धनं नासीत् अतः तौ पादाभ्याम् एव प्रस्थितवन्तौ ।

**अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 1×2=2**

(i) बालकस्य पिता कीदृशः आसीत् ?

(ii) तौ कथमेव प्रस्थितवन्तौ ?

(iii) बालकः कान् दृष्ट्वा दुःखेन निश्वसिति स्म ?

**आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 2×2=4**

(i) पितरं का बाधते स्म ?

(ii) सः बालकः कीदृशः आसीत् ?

(iii) पित्रा सह कार्यं कुर्वन् सः किं सम्पादितवान् ?

**इ. अस्य अनुच्छेदस्यकृते समुचितं शीर्षकं संस्कृतेन लिखत । 1**

**ई. निर्देशानुसारं प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत- (केवलं प्रश्नत्रयम्) 1×3=3**

(i) 'सः स्नेहपरः, मृदुभाषी, उत्साहमूर्तिः च आसीत्।' -अस्मिन् वाक्ये क्रियापदं किम् अस्ति ?

(क) स्नेहपरः (ख) च (ग) आसीत् (घ) उत्साहमूर्तिः

(ii) ' तीव्रा' इति विशेषणपदस्य विशेष्यपदं किम् ?

(क) जन्या (ख) निर्धनता (ग) असहायता (घ) इच्छा

(iii) ' कटुभाषी ' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम् ?

(क) उत्साहमूर्तिः (ख) स्नेहपरः (ग) मृदुभाषी (घ) दुःखेन

(iv) ते बालाः तम् अक्षराणि अपाठयन् । - अस्मिन् वाक्ये 'अपाठयन्' क्रियायाः कर्तृपदं किं प्रयुक्तम् ?

(क) तम् (ख) ते (ग) बालाः (घ) अक्षराणि

## 'ख' भागः

## रचनात्मककार्यम् ( 15 अङ्काः)

**2. भवतः नाम केशवः अस्ति । भवान् जलसंरक्षणस्य महत्त्वं वर्णयन् मित्रं गोविन्दं प्रति पत्रं लिखति । तदर्थं मञ्जूषायां प्रदत्तैः पदैः पत्रं पूरयित्वा पुनः लिखत- ½×10=5**

(i) ---------

दिनाङ्कः- ---------

प्रियमित्र (ii) ---------!

सप्रेम नमस्ते । अत्र कुशलं तत्रास्तु । भवतः पत्रं पठित्वा अहम् अतीव प्रसन्नताम् अनुभवामि यतोहि भवान् स्वमित्रैः (iii) ------- जलसंरक्षणप्रचारकार्ये रतः अस्ति । एषः तु उत्तमः (iv) ------ अस्ति । वयं सर्वे एव (v) --------- यत् जीवने जलस्य महत्त्वं तु अतुलनीयम् । जलम् एव (vi) --------- इति प्रसिद्धं वाक्यम्, परं तथापि वयम् अस्य (vii) --------- कुर्मः । अनेन आगामिकाले कियान् भीषणाजलसङ्कटः भवेत् इति कोऽपि न (viii) --------- । जलसंरक्षणार्थं जागरूकता अनिवार्या एव । यदि जनाः अस्मिन् विषये ध्यानं न दास्यन्ति तर्हि अस्माकं (ix) --------- स्थितिरपि अफ्रीकादेशवत् भविष्यति । अतः जलसंरक्षणार्थं चिन्तनम् आवश्यकम् अस्ति । शेषं सर्वं कुशलम् । भवतः पितृचरणयोः मम चरणवन्दना कथनीया। अनुजाय च स्नेहरशिः।

भवदीयः मित्रम्

(x) ---------

**मञ्जूषा**

| |
|---|
| अपव्ययं , परीक्षाभवनतः, सह, प्रयासः, जीवनम्, विचारयति, केशवः, जानीमः,देशस्य, गोविन्द |

**3.प्रदत्तचित्रं दृष्ट्वा मञ्जूषाप्रदत्तशब्दानां सहायतया पञ्चवाक्यानि लिखत – 1×5=5**



**मञ्जूषा**

| |
|---|
| रथम्, श्रीकृष्णः, अर्जुनः, उपदिशति, श्रृणोति, करबद्धः, तिष्ठति, रथे, अश्वाः, महाभारतस्य |

**अथवा**

**निम्नलिखितं विषयम् अधिकृत्य मञ्जूषाप्रदत्तशब्दानां साहाय्येन न्यूनातिन्यूनं पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत - 1x5=5**

**"क्रीडा-महत्त्वम्""**

**मञ्जूषा**

| |
|---|
| महत्त्वपूर्णम्, सर्वेभ्यः, अनिवार्यम्, स्वास्थ्याय, जीवनम्, संयमः, स्थानम्, सफलाः, जनाः, क्रीडा |

**4. अधोलिखितां कथां मञ्जूषायाः सहायतया पूरयित्वा पुनः लिखत-** **½×10=5**

एकस्मिन् (i) -------एकः (ii)------असत्यवादी च बालकः वसति स्म । तस्य नाम श्यामः (iii) --------। सः सर्वदा ग्रामीणजनान् तुदति स्म । उपहासेन (iv)-------- कथयति स्म -सिंहः आगतः,सिंहः आगतः, माम् रक्षत । सर्वे ग्रामीणजनाः अपि तस्य (v) --------धावन्ति स्म । श्यामः तान् अवदत् - अहं युष्मान् मूर्खान् अकरवम् । 'सर्वे तस्मै अक्रुध्यन् । एकदा साक्षात् सिंहः तस्य समीपम् आगच्छत् । (vi)-------- सहायतायै सर्वान् आह्वयति स्म । (vii)------- दिने (viii)--------------न आगच्छत् । परिणामतः (ix)-------- तम् अमारयत् । अतएव उक्तम्- असत्यं(x)----------- न वक्तव्यम् ।

**मञ्जूषा**

| |
|---|
| आसीत्, सिंहः, सर्वदा ,ग्रामे, धूर्तः, रक्षायै, कदापि, सः, तस्मिन्, कोऽपि |

**अथवा**

**अधोलिखितं सम्वादं मञ्जूषायाः सहायतया पूरयत-** **1×5=5**

प्रवीरः - श्वः अस्माकं समावर्तनसंस्कारः भविष्यति । न जाने कथं द्रुतगत्या वर्षाणि व्यतीतानि ।

अतुलः - (i) ------------?

प्रवीरः - अहं तु अभियन्त्रविज्ञानं पठिष्यामि ।

देवेशः - मया तु चिकित्साविज्ञानं पठिष्यते ।

नीलिमा -(ii) ------------ ।

वैष्णवी - अहं "मधुबनीचित्रकला" इत्यस्य प्रशिक्षणं प्राप्य कुटीरोद्योगं चालयिष्यामि ।
मह्यं चित्राङ्कनम् अतीव रोचते ।

अतुलः - (iii) ------------ ।

मण्डनः- अहो ! कीदृशम् आश्चर्यम् ? (iv) ------------ ।

देवेशः - मण्डन ! तव गणितक्षेत्रे दक्षतां दृष्ट्वा त्वयि भविष्यस्य गणितज्ञं पश्यामि अहम् । त्वं कृषिकार्यं करिष्यसि ?

मण्डनः - (v) ------------।

अवनीशः - सम्यक् कथितम् । अधुना तु सर्वकारेण भूमिस्वास्थ्यपत्रम् अपि प्रदीयते येन भूमिस्वास्थ्यपरीक्षणं भवति ।

सर्वे - भूमेः अपि स्वास्थ्यस्य परीक्षणम् ? (हसन्ति)

अवनीशः- अथ किम् ? भूमेः अपि स्थास्थ्यपरीक्षणं कर्तव्यम् ।

**मञ्जूषा**

- द्वादशकक्षानन्तरं त्वं कस्मिन् क्षेत्रे भविष्यनिर्माणं करिष्यसि ?
- अथ किम्? वैज्ञानिकरीत्या कृषिकार्यं कृत्वा अहं देशस्य कृषिसम्पदः विकासे योगदानं करिष्यामि।
- अहो महदाश्चर्यम् ! कक्षायाः सर्वाधिका मेधाविनी छात्रा चित्रकलाक्षेत्रे भविष्यनिर्माणं करिष्यति ?
- अहं वस्त्रालङ्करणविज्ञानं पठिष्यामि ।
- अहमपि कृषिविज्ञानं पठित्वा कृषिकार्यं करिष्यामि।

**'ग' भागः**

**अनुप्रयुक्तव्याकरणम् (25 अङ्काः)**

**5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत - (केवलं प्रश्नचतुष्टयम्)** **1x4=4**

(i) प्रयतिष्ये चक्षुषोऽस्य पुनः **<u>प्रत्यारोपणाय</u>** ।

(ii) मम नृत्यं तु **<u>प्रकृतेः + आराधना</u>** ।

(iii) अरुणाचलप्रदेशे **<u>पञ्चाशत् + अधिकाः</u>** नद्यः प्रवहन्ति ।

(iv) विमूढ़धीः **<u>भुङ्कते</u>**ऽ**<u>पक्वं</u>** फलम् ।

(v) **<u>पदच्छेदः</u>** तु पाठकस्य गुणः अस्ति ।

**6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्)** **1x4=4**

(i) स **<u>यूथपः</u>** सर्वान् कपीन् आहूय रहसि अवदत् ।

(क) यूथस्य पतिः (ख) यूथः पतिः (ग) यूथं पिबति इति (घ) यूथं पाति इति

(ii) एषः कामः एषः क्रोधः **<u>रजोगुणसमुद्भवः</u>** भवति ।

(क) रजोगुणस्य समुद्भवः (ख) रजोगुणेन समुद्भवः

(ग) रजोगुणात् समुद्भवः (घ) रजोगुणाय समुद्भवः

(iii) **<u>युधिष्ठिरः च अर्जुनः च</u>** रथारोहणं नाटयतः ।

(क) युधिष्ठिरार्जुनः (ख) युधिष्ठिरार्जुनं

(ग) युधिष्ठिरार्जुनौ (घ) युधिष्ठिरार्जुनाः

(iv) सः **<u>सकरुणम्</u>** उच्चैः अक्रन्दत् ।

(क) करुणया सह (ख) सह करुणम् (ग) करुणा सह (घ) सा करुणा

(v) सः अपि तत् नेत्रं **<u>स्थानम् अनतिक्रम्य</u>** अस्थापयत् ।

(क) यथास्थानः (ख) यथास्थानम्

(ग) यथास्थाने (घ) यथास्थान

**7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत- (केवलं प्रश्नचतुष्टयम्)** **1x4=4**

(i) परद्रव्ये **<u>अनासक्ता</u>** सा न्यवेदयत् ।

(क) अनासक्त+आ (ख) अनासक्ता+आ (ग) अनासक्त+टाप् (घ) अनासक्ता+टाप्

(ii) **<u>मधुरभाषिणी</u>** वाणी पुरुषं प्रह्लादयति ।

(क) मधुरभाषिन् + ङीप् (ख) मधुरभाषी + ङीप्

(ग) मधुरभाषि + ङीप् (घ) मधुरभाषिनी + ङीप्

(iii) वाक्पटुः **<u>धैर्य +मतुप्</u>**, सभायाम् अपि अकातरः मन्त्री परैः न परिभूयते ।

(क) धैर्यमत् (ख) धैर्यमान् (ग) धैर्यवान् (घ) धैर्यवत्

(iv) अस्मिन् अवसरे कृषिभूमिपूजनं सेतुनिर्माणं च **<u>सामाजिकं</u>** कार्यं भवति ।

(क) समाज+ठक् (ख) समाज+ठक् +ङीप् (ग) सामाज+ठक् (घ) समाज +ङीप्

(v) केचन च **<u>पञ्च+ त्व</u>** गताः।

(क) पञ्चत्व (ख) पञ्चात्व (ग) पञ्चेत्वं (घ) पञ्चत्वं

**8. वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं सम्वादं पुनः लिखत - (केवलं प्रश्नत्रयम्)** **1x3=3**

गायत्री - विनीते ! त्वम् अधुना किं करोषि ?

विनीता - (i)------------- नवीनं पुस्तकं मणिका पठयते ।

गायत्री - कीदृशः संयोगः ! अहम् अपि (ii)--------- एव पठितुम् उपविशामि ।

विनीता - काचित् ध्वनिः आगच्छति ।

विनीता - मया उच्चैः (iii)----------- ।

गायत्री - विनीते ! त्वं कं कार्यक्रमं दूरदर्शने (iv) ----------- ?

विनीता - अहं समाचारं पश्यामि ।

**मञ्जूषा**

| |
|---|
| पठ्यते, मणिकाम् , पश्यसि, मया |

**9. कालबोधकशब्दैः अधोलिखित-दिनचर्यां पूरयत- (केवलं प्रश्नत्रयम्)** **1x3=3**

(i) बालकः -----(5.30) वादने उत्तिष्ठति ।

(ii) पश्चात् सः -----(6.15) वादने स्नानं करोति ।

(iii) सः -----(7.45) प्रातराशं करोति ।

(iv) सः -----(2.00) विद्यालयात् आगच्छति ।

**10. मञ्जूषाप्रदत्तैः उचित-अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत - (केवलं प्रश्नचतुष्टयम्)** **1x4=4**

(i) ------------ दानशालासु विचरन् राजा अचिन्तयत् ।

(ii) सः सर्वं वृत्तान्तं निवेद्य ----------- अक्रन्दत् ।

(iii) ------------ रमणीया हि सृष्टिः एषा ।

(iv) परमापद्गतेन ------------ नैव इदमस्त्रं प्रयोक्तव्यम् ।

(v) 'ओरिया' पर्व फरवरी ---------- मासे मान्यते ।

**मञ्जूषा**

| |
|---|
| अपि , इति, अधुना, उच्चैः, एकदा |

**11. अधोलिखितवाक्येषु रेखाङ्कित -अशुद्धपदाय उचितपदं विकल्पेभ्यः चित्वा लिखत - (केवलं प्रश्नत्रयम्)** **1x3=3**

(i) **<u>प्रबुद्धः</u>** दम्पती आश्चर्येण अतिष्ठताम् ।

(क) प्रबुद्धौ (ख) प्रबुद्धाय (ग) प्रबुद्धाः (घ) प्रबुद्धं

(ii) जानीमः भवतः **<u>दिव्यः</u>** शक्तिम् ।

(क) दिव्यः (ख) दिव्याः (ग) दिव्यां (घ) दिव्या

(iii) **<u>अहं</u>** नर्तनात् अन्यत् किम् अपरं जानासि ?

(क) यूयं (ख) युवां (ग) त्वं (घ) आवां

(iv) कपयः प्रहस्य **<u>वदतु</u>** ।

(क) अवदः (ख) अवदन् (ग) वदताम् (घ) वदिष्यसि

**'घ' भागः**

**पठितावबोधनम् (30 अङ्काः)**

**12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-** **5**

अस्ति कर्मपुरनाम्नि नगरे प्रच्छन्नभाग्य-नामधेयः कश्चित् कुमारः। बाल्ये वयसि विद्यापराङ्मुखः स केनचित् दुष्टबुद्धिनाम्ना चौरेण सह चौर्यकर्मणि निरतः सञ्जातः । एकदा स दुष्टबुद्धिना सार्धं कस्यचित् श्रेष्ठिनः गेहे धनहरणार्थं ग्रामान्तरं प्रस्थितः। अथ व्रजन्तौ तौ गर्तसङ्कुले मार्गे क्रीडतः कांश्चित् बालकान् प्रेक्ष्य अवदताम् - भो भो बालकाः ! कथमत्र नतोन्नते विषमे मार्गे क्रीडथ ? यदि कश्चित् गर्ते पतेत् तर्हि स विकलाङ्गो भूत्वा चिरं क्लेशम् अनुभवेत् । तच्छ्रुत्वा तेषु कश्चित् उद्दण्डः बालकः उवाच-अयि भो ! यद्येवं तर्हि कथं भवन्तौ सुपथं परित्यज्य अनेन कुपथेन गन्तुं प्रवृत्तौ ? अपि इदं श्रेयकरम् ?

**अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** **½×2=2**

(i) कुमारस्य नाम किम् आसीत् ?

(ii) दुष्टबुद्धिना किमर्थं ग्रामान्तरं प्रस्थितः ?

(iii) कुमारः केन सह चौर्यकर्मणि निरतः सञ्जातः?

**आ.पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** **1×2=2**

(i) कः कस्मिन् च निरतः सञ्जातः?

(ii) कश्चित् गर्ते पतित्वा किम् अनुभवेत् ?

(iii) उद्दण्डः बालकः किम् उवाच ?

**इ.निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्)** **1×2=2**

(i) 'अवदताम् ' इति क्रियायाः कर्तृपदं किम् ?

(ii) 'कस्यचित् श्रेष्ठिनः' अनयोः पदयोः विशेष्यपदं किम् अस्ति ?

(iii) 'कुपथं ' इति पदस्य विपर्ययपदं किम् ?

**13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत -** **5**

त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत् ।
परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः॥
आचारः प्रथमः धर्मः इत्येतद् विदुषां वचः।
तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः॥

**अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** **½×2=2**

(i) कः प्रथमः धर्मः अस्ति ?

(ii) प्राणेभ्योऽपि विशेषतः कं रक्षेत् ?

(iii) मूढमनुष्यः कीदृशीं वाचं त्यजति ?

**आ.पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** **1×2=2**

(i) विमूढधीः किं करोति ?

(ii) विदुषां वचः किम् अस्ति ?

(iii) कः विमूढधीः भवति ?

**इ.निर्देशानुसारम् उत्तरत-(केवलं प्रश्नद्वयम्)** **1×2=2**

(i) 'पक्वं' इति पदस्य किं विपर्ययपदं श्लोके प्रयुक्तम् ?

(ii) 'मूर्खः ' इत्यस्य किं पर्यायपदम् अत्र प्रदत्तम् ?

(iii) 'भुङ्क्ते' इति क्रियापदस्य कर्तृपदं किम् ?

**14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत -** **5**

भीमः - (युधिष्ठिरं प्रति) भ्रातः ! द्रौणिम् अनुगन्तुं मह्यम् अनुमतिं ददातु भवान् ।

युधिष्ठिरः - गच्छ वत्स ! विजयी भव, नकुलः तव सारथिः भवतु ।

(भीमसेनः निर्गच्छति, श्रीकृष्णः अर्जुनेन सह प्रविशति)

श्रीकृष्णः - भो धर्मराज ! समीचीनं न कृतं भवता । पुत्रशोकविह्वलः भीमसेनः एकाकी एव द्रौणिं हन्तुम् अभिधावति ।

युधिष्ठिरः - भगवन् ! सः तु एकाकी एव द्रोणपुत्राय अलम् ।

श्रीकृष्णः - वत्स ! न जानाति भवान् द्रौणेः चपलां प्रकृतिम् । पितुः द्रोणात् प्राप्तं ब्रह्मशिरो नाम अस्त्रं विद्यते तस्य पार्श्वे । यदि तत् प्रयुज्यते, सर्वा पृथ्वी दग्धा स्यात् ।

अ. **एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)** **½×2=2**

(i) कः एकाकी एव द्रोणपुत्राय अलम् आसीत् ?

(ii) श्रीकृष्णः युधिष्ठिरं केन पदेन सम्बोधयति ?

(iii) भीमसेनः एकाकी एव कं हन्तुम् अभिधावति ?

आ. **पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)** **1×2=2**

(i) यदि ब्रह्मास्त्रं प्रयुज्यते तदा पृथ्वी कीदृशी स्यात् ?

(ii) भीमस्य सारथिः कः भवतु ?

(iii) कः निर्गच्छति, कः अर्जुनेन सह प्रविशति ?

**इ.निर्देशानुसारम् उत्तरत-(केवलं प्रश्नदवयम्)** **1×2=2**

(i) 'अश्वत्थामानम्' अस्य किं पर्यायपदं संवादे प्रयुक्तम् ?

(ii) 'चपलां प्रकृतिम्' अनयोः किं विशेषणपदम् ?

(iii) 'भीमः तं हन्तुम् अभिधावति' अत्र क्रियापदं किम् ?

**15. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत- (केवलं पञ्चप्रश्नाः)** **1x5=5**

(i) मम पिच्छानाम् **<u>अपूर्वं</u>** सौन्दर्यम् ।

(ii) पापकर्मणा द्रौणिना **<u>मे</u>** पुत्राः हताः ।

(iii) राजा **<u>शक्राय</u>** चक्षुः समर्पितवान् ।

(iv) राजा पुत्रवत् **<u>प्रजा:</u>** पालयति स्म ।

(iv) न वयम् **<u>अटव्यां</u>** रुक्षफलानि भक्षयिष्याम:।

(v) **<u>मनस:</u>** निग्रह: वायोरिव सुदुष्करम् अस्ति ।

**16. मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत -** **½ x4=2**

कपीनां मेदसा दोषो वह्निदाहसमुद्भवः
अश्वानां नाशमभ्येति तमः सूर्योदये यथा ॥

**अन्वयः-** (i) ------- वह्निदाहसमुद्भवः (iii)--------कपीनां मेदसा (iii)--------अभ्येति यथा (iv) ----------- तमः (नाशमभ्येति) ।

**मञ्जूषा**

| |
|---|
| दोषः, सूर्योदये, नाशम्, अश्वानां |

**अथवा**

**मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत-**

असंशयं महाबाहो मनो दुर्निग्रहं चलम्

अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥

**भावार्थः -** हे महाबाहो! अत्र सन्देहः नास्ति यत् एतत् (i)----------अतीव चञ्चलम् अस्ति ।
इदं (ii)----------नियन्त्रितं भवति परन्तु यदि वयं पुनः पुनः (iii)----------
कुर्मः विरक्ताः च भवामः तर्हि नूनम् एतत् वशीकर्तुं (iv)---------- ।

**मञ्जूषा**

| |
|---|
| बहुकष्टेन, अभ्यासं, शक्नुमः, मनः |

**17. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत-**
**(केवलं प्रश्नचतुष्टयम्)** **(1x4=4)**

(i) काकस्य **<u>गात्रं</u>** यदि काञ्चनस्य तर्हि सः काकः एव ।
(क) गोत्रं (ख) शरीरं (ग) नेत्रं (घ) कुटुम्बं

(ii) अलम् अलं **<u>मिथः</u>** कलहेन ।
(क) परस्परं (ख) ईदृशः (ग) मिथकः (घ)व्यर्थम्

(iii) आपदां **<u>तरणिः</u>** धैर्यम् ।
(क) नौका (ख) सूर्यः (ग) तोरणम् (घ) कोपः

(iv) **<u>विद्धि</u>** एनं हि वैरिणम् ।
(क) पश्य (ख) अर्पय (ग) जानीहि (घ) कुरु

(v) केन <u>प्रयुक्तः</u> पुरुषः पापं चरति ।
(क) प्रकटितः (ख) उक्तः (ग) प्रसिद्धः (घ) प्रेरितः

**18. अधोलिखित-कथां रिक्तस्थानानि पूरयित्वा पुनः लिखत -** **½ x8=4**

प्रभातवेलायां राजहंसी राजहंसः च (i)---------- विहरतः स्म । तदैव सहसा (ii)--------ध्वनिं श्रुत्वा राजहंसः (iii)---------- च पृच्छति यत् इयं (iv)---------- कस्य अस्ति ? राजहंसी 'काकस्य ध्वनिः इयम्' इति (v)---------- । सा कथयति यत् काकस्य (vi)---------- कृष्णं, कर्म अपि कृष्णम् एव अस्ति । तदैव (vii)----------- सक्रोधं प्रविश्य वदति मम वर्णः तु (viii)----------- श्रीकृष्णस्य सदृशो वर्तते । अहं तु छात्रेभ्यः आदर्शः अस्मि । अहमेव स्वक्वणितैः जनान् प्रातः प्रबोधयामि ।

**मञ्जूषा**

| |
|---|
| सरस्तीरे, वदति, श्रीरामस्य, राजहंसीं, ध्वनिः, शरीरं, काकः, काकस्य |

**************